श्री मुत्तुस्वामि दीक्षित विरचित

# नीलोत्पलाम्बा गौळान्तराग कीर्तनानि

## १. नीलोत्पलाम्बा जयति

रागं: नारायणगौळ (२८) तालं: मिश्र चापु

पल्लवि

नीलोत्पलाम्बा जयति नित्यशुद्धशुभदायिका श्री

अनुपल्लवि

मूलाज्ञानहरगुरुगुहजननी फाललोचनी
पुराणी पन्नगवेणी नतवाणी

चरणम्

शिवकामेश्वरी शङ्करी शृङ्गाररसकरी
पाशाङ्कुशधरी परमदयाकरी
भवरोगहरनिपुणवरदायिन्यां
नारायणगौळ रागमोदिन्यां
भुक्तिमुक्तिमच्चित्तं विलयतु

✠ ✠ ✠ ✠ ✠

## २. नीलोत्पलाम्बाम्

रागं: नारीरीतिगळ (२०)      तालं: मिश्र चापु

### पल्लवि

नीलोत्पलाम्बां भज रे रे चित्त
वीथिविटङ्कत्यागराजान्तरङ्गां श्री

### अनुपल्लवि

मूलकूटत्रयकलेबरशोभारुणां

मुचुकुन्दादिनुतपङ्कजचरणाम्

मूलविद्यादाननिपुणां
विधिपूजितविनोदकिरणाम्

### चरणम्

कमलानगरनिवासिनीं गुरुगुहमार्गरीतिकौळिनीम्

कमनीयकामकलाप्रदर्शिनीं कादिहाद्यादिमनुविश्वासिनीम्

सामगानशिरःकम्पिनीं अखिलमहादुरितभञ्जनीम्

कोमळकुचकचभराङ्गिणीं मुकुन्दसोदरीं पुराणीम्

✠ ✠ ✠ ✠ ✠

# ३. नीलोत्पलाम्बिकया

रागं: कन्नडगौळ (२२)　　　तालं: आदि

पल्लवि

नीलोत्पलाम्बिकया निर्वाणसुखप्रदया रक्षितोऽहम्

अनुपल्लवि

वल्लीशगुरुगुहपूजितया वरलक्ष्मीवाणीसेवितया
हल्लीशलास्यसन्तुष्टया आरक्तवर्णशोभितकरया

चरणम्

काशीकन्नडगौळदेशादिवासदासजनावनतोषितया

वासवादिवन्दितवागीशवासुदेवाद्याराधितया
श्रीशिवपुराणप्रतिपादितया शिवशङ्करनायिकया श्री

✠ ✠ ✠ ✠ ✠

# ४. नीलोत्पलाम्बिकायै

रागं: केदारगौळ (२८)  तालं: आदि

पल्लवि

नीलोत्पलाम्बिकायै नमस्ते जगदम्बिकायै

अनुपल्लवि

मूलाधारक्षेत्रस्थितायै मुचुकुन्दवरप्रदायै
मूलमन्त्रात्मिकायै मूलाज्ञानहरगुरुगुहवरदायै

चरणम्

कामसञ्जीविन्यै कमलावाणीसेवितायै

कलिकल्मषनाशिन्यै करुणामृतरसप्रवाहिन्यै

कामेश्वरमोहितकौळिन्यै कामतन्त्रवितरणनलिन्यै
कमलेशपूजितत्रिकोणायै कामितार्थफलप्रदनिपुणायै

✠ ✠ ✠ ✠ ✠

# ५. नीलोत्पलाम्बिकायाः परम्

रागं: गौळ (१५) तालं: रूपकम्

पल्लवि

नीलोत्पलाम्बिकायाः परं नहि रे रे चित्त

अनुपल्लवि

सालोकादि मुक्तिदायिन्याः

सुरपतिगुरुगुहसन्नुतचरणायाः
नीलरत्नमणिभूषिण्याः निरञ्जन्याः

चरणम्

स्थूलसूक्ष्मकारणरूपिण्याः

बालचन्द्रसेवितवरदायिन्याः
कैलासविलसितकुळकौळमार्गयोगिन्याः

✠ ✠ ✠ ✠ ✠

## ६. नीलोत्पलाम्बिकायाः

रागं: मायामाळवगौळ (१५) तालं: मिश्र चापु

पल्लवि

नीलोत्पलाम्बिकायास्तव दासोऽहं श्री

अनुपल्लवि

नीलाम्बरानुजायाः निरुपमपदाम्बुजायाः
नीलकण्ठार्धशरीरिण्याः निखिललोकजनन्याः

चरणम्

मायामाळवगौळादिदेशप्रकाशिन्याः

मातङ्गवदनेन्द्रादिपूजितवरदायिन्याः

मायामयविश्वोत्पत्तिस्थितिलयकारणायाः
माधुर्यामृतधारमहादेवगुरुगुहपाशिन्याः

✠ ✠ ✠ ✠ ✠

# ७. नीलोत्पलाम्बिकायाम्

रागं: पूर्वगौळ (२९)  तालं: रूपकम्

पल्लवि

नीलोत्पलाम्बिकायां भक्तिं करोमि श्री

अनुपल्लवि

नीलोत्पलनायकसमेतायां
निखिलागमसन्नुतायां
नीलाम्बरपुष्पमालावृतायाम्

चरणम्

कविजनादिमोदिन्यां कमलेशपालिन्यां
सूर्यकोटिप्रकाशिन्यां सूरिजनोपासित-
पूर्वगौळप्रकाशिन्याम्
अविद्याविद्यास्वरूपिण्यां आरक्तवर्णरूपिण्यां
इभवदनगुरुगुहादिजनन्याम्

✠ ✠ ✠ ✠ ✠

# ८. नीलोत्पलाम्बिके

रागं: छायागौळ (१५)  तालं: रूपकम्

पल्लवि

नीलोत्पलाम्बिके नित्यशुद्धात्मिके मामव

अनुपल्लवि

त्रिलोकजननि त्रिभुवनमोहिनि
त्रैलोक्यचक्रवासिनि सद्गुरुगुहविश्वासिनि

चरणम्

मायाप्रपञ्चातीतस्वरूपिणि

मुचुकुन्दभक्तपालिनि वरदायिनि

छायागौळरागंओदिनि निरञ्जनि
सायुज्यादिदायिनि सच्चिदानन्दरूपिणि

✠ ✠ ✠ ✠ ✠

# ९. श्रीनीलोत्पलनायिके

रागं: नारीरीतिगौळ (२०) तालं: रूपकम्

पल्लवि

श्रीनीलोत्पलनायिके जगदम्बिके
श्रीनगरनायिके मामव वरदायिके

अनुपल्लवि

दीनजनार्तिप्रभञ्जनरीतिगौरवे

देशिकप्रदर्शितचिद्रूपिणि नतभैरवे

आनन्दात्मानुभवे अद्रिराजसमुद्भवे
सूनशरारिवैभवे ज्ञानसुधार्णवे शिवे

चरणम्

संकल्पविकल्पात्मकचित्तवृत्तिजाले

साधुजनाराधितसद्गुरुकटाक्षमूले

संकटहरधुरीणतरगुरुगुहानुकूले

समस्तविश्वोत्पत्तिस्थितिलयादिकाले

विटङ्कत्यागराजमोहितविचित्रलीले

शङ्करि कृपालवाले हाटकमयचेले

पङ्कजनयनविशाले पद्मरागंअणिमाले
शङ्करसन्नुतबाले शारदे गानलोले

✠ ✠ ✠ ✠ ✠